# १७ सप्तदश दशकः - सुदर्शन कोसल प्राप्तिः

युधाजितं शत्रुजितं च हत्वा रणाङ्गणस्था नुतिभिः प्रसन्ना ।
सुबाहु मुख्या ननुगृह्य भक्तान् सर्वेषु पश्यत्सु तिरोदधाथ ॥ १७-१॥

पृष्टो नृपान् प्राह सुदर्शनस्तान् दृष्टा भवद्भिः खलु सर्वशक्ता ।
या निर्गुणा योगिभि रप्यदृश्या दृश्या च भक्तैः सगुणा विनीतैः ॥ १७-२॥

या राजसीदं सृजतीव शक्तिः या सात्विकी पालयतीव विश्वम् ।
या तामसी संहरतीव सर्वं सद्वस्तु सैवान्यदस त्समस्तम् ॥ १७-३॥

भक्तार्ति हन्त्री करुणामयी सा भक्तद्रुहां भीतिकरी प्रकामम् ।
वसन् भरद्वाज तपोवनान्ते चिराय मात्रा सह तां भजेऽहम् ॥ १७-४॥

तामेव भक्त्या भजतेह भुक्ति मुक्तिप्रदा मस्तु शुभं सदा वः ।
श्रुत्वेद मानम्र मुखा स्तथेति सम्मन्त्र्य भूपाश्च ततो निवृत्ताः ॥ १७-५॥

सुदर्शनो मातृ वधू समेतः सुबाहु मापृच्छ्य रथाधिरूढः ।
पुरीमयोध्यां प्रविशन् पुरेव सीतापति स्तोषयति स्म सर्वान् ॥ १७-६॥

लीलावतीं प्राप्य विमातरं च नत्वा विषण्णां हत पुत्रताताम् ।
सदुक्तिभिः कर्मगतीः प्रबोध्य स सान्त्वयामास महेशि भक्तः ॥ १७-७॥

जनेषु पश्यत्सु सुदर्शनोऽत्र त्वां पूजयित्वा गुरुणाऽभिषिक्तः ।
राज्ये त्वदीयं गृहमाशु कृत्वा पूजा विधानादि च संवृधत्त ॥ १७-८॥

तस्मिन् नृपे त्वत्सदनानि कृत्वा जनाः प्रतिग्राम मपूजयंस्त्वाम् ।
काश्यां सुबाहुश्च तथाऽकरोत्ते सर्वत्र पेतुः करुणा कटाक्षाः ॥ १७-९॥

न कर्मणा न प्रजया धनेन न योग साङ्ख्यादि विचिन्तया च ।
न च व्रतेनापि सुखानुभूतिः भक्त्यैव मर्त्यः सुखमेति मातः ॥ १७-१०॥

नाहं सुबाहुश्च सुदर्शनश्च न मे भरद्वाज मुनिः शरण्यः ।
गुरुः सुहृद्बन्धुरपि त्वमेव महेश्वरि त्वां सततं नमामि ॥ १७-११॥